# श्री सिद्धिविनायकाष्टोत्तरशतनामावलिः

ओं श्री गणपतये नमः
ओं श्री हरिश्री गणपताये नमः

ओं श्री प्रथमं वक्रतुण्डं च एकदन्तं द्वितीयं
तृतीयं कृष्णपिंगाक्षं गजवक्त्रं चतुर्त्थकं
लंबोदरं पञ्चमं च षष्टं विकटमेव च
सप्तमं विघ्नराजं च धूम्रवर्ण्णं धताष्टमं
नवमं फालचन्द्रं च दशमं तु विनायकं
एकादशं गणपति द्वादशं तु गजाननं
द्वादशैतानि नामानि त्रिसन्ध्यं च पठेन्नरः
न च विघ्नभयं तस्व सर्व्वसिद्धिकरं प्रभो

## नामावलि

ओं विनायकाय नमः
ओं विघ्नराजाय नमः
ओं गौरीपुत्राय नमः
ओं गणेश्वराय नमः
ओं स्कन्दाग्रजाय नमः
ओं अव्ययाय नमः
ओं पूताय नमः
ओं दक्षाध्यक्ष्याय नमः
ओं द्विजप्रियाय नमः
ओं अग्निगर्भच्छिदे नमः 10
ओं इन्द्रश्रीप्रदाय नमः
ओं वाणीबलप्रदाय नमः
ओं सर्वसिद्धिप्रदायकाय नमः
ओं शर्वतनयाय नमः
ओं शर्वरीप्रियाय नमः
ओं सर्वात्मकाय नमः
ओं सृष्टिकर्त्रे नमः

ओं देवानीकार्च्चिताय नमः
ओं शिवाय नमः
ओं शुद्धाय नमः 20
ओं बुद्धिप्रियाय नमः
ओं शान्ताय नमः
ओं ब्रह्मचारिणे नमः
ओं गजाननाय नमः
ओं द्वैमात्रेयाय नमः
ओं मुनिस्तुत्याय नमः
ओं भक्त विघ्न विनाशनाय नमः
ओं ऐकदन्ताय नमः
ओं चतुर्बाहवे नमः
ओं शक्तिसंयुताय नमः 30
ओं चतुराय नमः
ओं लंबोदराय नमः
ओं शूर्पकर्णाय नमः
ओं हेरांबाय नमः
ओं ब्रह्मवित्तमाय नमः
ओं कालाय नमः
ओं ग्रहपतये नमः
ओं कामिने नमः
ओं सोमसूर्याग्निलोचनाय नमः
ओं पाशाङ्कुशधराय नमः 40
ओं चण्डाय नमः
ओं गुणातीताय नमः
ओं निरञ्जनाय नमः
ओं अकल्मषाय नमः
ओं स्वयंसिद्धार्च्चिदपदाय नमः
ओं बीजपूरकाय नमः
ओं अव्यक्ताय नमः
ओं गदिने नमः
ओं वरदाय नमः
ओं शाश्वताय नमः 50
ओं कृतिने नमः
ओं विद्वत्प्रियाय नमः
ओं वीतभयाय नमः
ओं चक्रिणे नमः

ओं इक्षुचापधृते नमः
ओं अब्जोत्पलकराय
ओं श्रीशाय नमः
ओं श्रीपतये नमः
ओं स्तुतिहर्षिताय नमः
ओं कलाद्रिभृते नमः 60
ओं जटिने नमः
ओं चन्द्रचूडाय नमः
ओं अमरेश्वराय नमः
ओं नागयज्ञोपवीतिने नमः
ओं श्रीकण्ठाय नमः
ओं रामार्च्चितपादाय नमः
ओं वृत्तिने नमः
ओं स्थूलकण्ठाय नमः
ओं त्रयीकर्त्रे नमः
ओं सामघोषप्रियाय नमः 70
ओं पुरुषोत्तमाय नमः
ओं स्थूलतुण्डाय नमः
ओं अग्रगण्याय नमः
ओं ग्रामण्ये नमः
ओं गणपाय नमः
ओं स्थिराय नमः
ओं वृद्धिदाय नमः
ओं सुभगाय नमः
ओं शूराय नमः
ओं वागीशाय नमः 80
ओं सिद्धिदाय नमः
ओं दूर्वाबिल्वप्रियाय नमः
ओं कान्ताय नमः
ओं पापहारिणे नमः
ओं कृतागमाय नमः
ओं समाहिताय नमः
ओं वक्रतुण्डाय नमः
ओं श्रीप्रदाय नमः
ओं सौम्याय नमः
ओं भक्तकांक्षितदाय नमः 90
ओं अच्युताय नमः

ओं केवलाय नमः
ओं सिद्धाय नमः
ओं सच्चिदानन्दविग्रहाय नमः
ओं ज्ञानिने नमः
ओं मायायुक्ताय नमः
ओं दन्ताय नमः
ओं ब्रह्मिष्ठाय नमः
ओं भयवर्ज्जिताय नमः
ओं प्रमत्तदैत्यभयदाय नमः 100
ओं व्यक्तमूर्त्तये नमः
ओं अमूर्त्तये नमः
ओं पार्वतीशङ्करोत्सङ्ग खेलनोत्सव लालनाय नमः
ओं समस्तजगदाधाराय नमः
ओं मूषकवाहनाय नमः
ओं हृष्टस्तुताय नमः
ओं प्रसन्नात्मने नमः
ओं सर्वसिद्धिप्रदायकाय नमः 108

इति श्रीसिद्धिविनायकाष्टोत्तरशतनामावलिः

~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~
~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~~